# Sagunanirgunabrahmabhedavadah

# સગુણનિર્ગુણબ્રહ્માભેદવાદઃ

## Document Information

Text title : Shri Mangalacharyamahamunindrapranitah Sagunanirgunabrahmabhedavadah

File name : saguNanirguNabrahmAbhedavAdaHmangalAchAryamahAmunIndra.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : maNgalAchAryamahAmunIndra

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# સગુણનિર્ગુણબ્રહ્માભેદવાદઃ

જગતઃ સર્જકં ચાથ રક્ષકં લયકારકમ્ ।
મુક્તિદં ચ જગન્મૂલં વેદવેદ્યં પરેશ્વરમ્ ॥ ૧॥

સાકારં ચ નિરાકારં સગુણં નિર્ગુણં તથા ।
વન્દે પરાત્પરં બ્રહ્મ શ્રીરામં જાનકીશ્વરમ્ ॥ ૨॥

નિગ્રહવર્જિતાં રમ્યાં શ્રીરામસ્યાતિવલ્લભામ્ ।
અનુગ્રહમયીં સીતાં વન્દેહં વિશ્વમાતરમ્ ॥ ૩॥

શ્રીમદ્રામકૃપાપાત્રં રામસેવારતં સદા ।
હનૂમન્તમહં વન્દે સર્વવિઘ્નવિનાશકમ્ ॥ ૪॥

બ્રહ્મસૂત્રવિધાતારં શ્રીમન્તં બાદરાયણમ્ ।
બોધાયનં તથા વન્દે વૃત્તિકૃત્પુરુષોત્તમ્ ॥ ૫॥

આનન્દભાષ્યકર્ત્તારમાચાર્યચક્રવર્ત્તિનમ્ ।
વન્દે યતીશ્વરં રામાનન્દાચાર્યં જગદ્ગુરુમ્ ॥ ૬॥

વ્રતીન્દ્રં બ્રહ્મતત્ત્વજ્ઞં નૈષ્ઠિકબ્રહ્મચારિણમ્ ।
ટીલાપીઠેશ્વરં વન્દે ટીલાચાર્યં જગદ્ગુરુમ્ ॥ ૭॥

શ્રીમદ્રામસમારમ્ભાં રામાનન્દાર્યમધ્યમામ્ ।
અસ્મદાચાર્યપર્યન્તાં વન્દે ગુરુપરમ્પરામ્ ॥ ૮॥

નત્ત્વા ગુરોઃ પદામ્ભોજં ભવામ્ભોધેશ્ચ તારકમ્ ।
સગુણનિર્ગુણબ્રહ્માભેદવાદં કોરામ્યહમ્ ॥ ૯॥

નિષ્કલં નિષ્ક્રિયં ચાથ નિર્ગુણં ચ નિરઞ્જનમ્ ।
"વિજ્ઞાનમાનન્દં બ્રહ્મ" ઇત્યેવં શ્રુતિવાક્યતઃ ॥ ૧૦॥

નિષેધઃ પ્રાકૃતાનાં હિ ગુણાનામેવ રાઘવે ।
પરાસ્ય શક્તિરિત્યાદિશક્ત્યાદિબોધકશ્રુતેઃ ॥ ૧૧॥

નનુ સદેવ સોમ્યેદમગ્ર આસીદિતિ શ્રુતે ।
સૃષ્ટેઃ પૂર્વં મતં બ્રહ્મ ભેદત્રયવિવર્જિતમ્ ॥ ૧૨॥

નિર્વિશેષતયા તસ્ય સગુણત્વં કથં ભવેત્ક્ષ ।
ઇતિ ચેન્ન યતઃ શ્રુત્યા કારણં બ્રહ્મ બોધ્યતે ॥ ૧૩॥

સૂક્ષ્માચિચ્ચિદ્વિશિષ્ટં હિ કારણં બ્રહ્મ કથ્યતે ।
અન્યથા બ્રહ્મણસ્તસ્માજ્જગત્સૃષ્ટિર્ન સમ્ભવેત્ ॥ ૧૪॥

અઙ્ગીકારેણ માયાયા જગદુત્પત્તિસમ્ભવઃ ।
ઇતિ ચેન્ન, વિકલ્પં ન સહેતૈતદ્ વચો યતઃ ॥ ૧૫॥

સર્વકર્ત્રી હિ સા માયા નિર્વિશેષમહં તથા ।
ઇત્યેવં બ્રહ્મ જાનાતિ નવા જાનાતિ તન્નનુ ॥ ૧૬॥

આધે તુ જ્ઞાતૃતાઽઽપત્ત્યા નિર્વિશેષં કથં હિ તત્ ।
અન્ત્યેઽજ્ઞત્વેન માયાયા અઙ્ગીકારો ન સમ્ભવેત્ ॥ ૧૭॥

યો વેત્તિ યુગપત્ સર્વં પ્રત્યક્ષેણ સદા સ્વતઃ ।
ઇત્યાદીનાં શ્રુતીનાં હિ વિરોધશ્ચ ભવેદ્ ધ્રુવમ્ ॥ ૧૮॥

અઙ્ગીકારાય માયાયા બ્રહ્મશક્તિર્મતા ન વા ।
બ્રહ્માદ્યે નિર્વિશેષં નોઽઙ્ગીકારશ્ચાન્તિમે ન હિ ॥ ૧૯॥

કિં ચ માયાત્મકં બ્રહ્મ તદોચ્યતાં ન વા તથા ।
અઙ્ગીકારવચો વ્યર્થમાદ્યેઽન્ત્યેઽનન્તતા કથમ્ ॥ ૨૦॥

અઙ્ગીકારાન્નુ પૂર્વસ્મિન્ કાલે માયા કમાશ્રિતા ।
બ્રહ્માશ્રિતેતિચેત્ તર્હિ સર્વદા સ્યાદ્ વિશિષ્ટતા ॥ ૨૧॥

તથા ચાદ્વૈતતાહાનિર્બ્રહ્મણશ્ચ ભવેદ્ ધ્રુવમ્ ।
ઈશસ્યૈવ ગુણાઃ સર્વે મતાઃ સર્વજ્ઞતાદયઃ ॥ ૨૨॥

બ્રહ્મણિ નિર્વિશેષે નુ તસ્માત્ સમ્ભવન્તિ ન ।
તે માયોપાધિકા ઈશે મતાઃ સ્વાભાવિકા ન હિ ॥ ૨૩॥

અસ્માન્માયીતિ સમ્પ્રોક્તઃ શ્રુતૌ માયિતયેશ્વરઃ ।
ઇતિ ચેન્ન, કુતો યસ્માન્માયી વિચિત્રકારકઃ ॥ ૨૪॥

માયયા સતતં વેત્તિ પ્રાચીનં ચ શુભાશુભમ્ ।
માયાશબ્દસ્તથા ચૈવં ક્વચિજ્ જ્ઞાનસ્ય વાચકઃ ॥ ૨૫॥

બ્રહ્મણો યત્તદ્દ્રેશ્યમિત્યુક્તા નિર્વિશેષતા ।
તદન્યથાઽનુપપત્ત્યા સગુણાન્નિર્ગુણં પરમ્ ॥ ૨૬॥

ઇતિ ચેન્ન યતઃ શ્રુત્યા નિષિધ્ય પ્રાકૃતાન્ ગુણાન્ ।
અનૌપાધિકશક્ત્યાદિગુણા બ્રહ્મણિ બોધિતાઃ ॥ ૨૭॥

સગુણ નિર્ગુણશૈક્યં પુરાણેઽભિહિતં તતઃ ।
સગુણો નિર્ગુણો વિષ્ણુર્જ્ઞાનગમ્યો હ્યસૌ સ્વદૃક્ ॥ ૨૮॥

ન હિ તસ્ય ગુણાઃ સર્વે સર્વૈર્મુનિગણૈરપિ ।
વક્તું શક્યા વિયુક્તસ્ય સત્વાદ્યૈરખિલૈર્ગુણૈઃ ॥ ૨૯॥

બ્રહ્મણઃ સગુણત્વં તત્ કલ્યાણગુણયોગતઃ ।
પ્રાકૃતગુણરાહિત્યાન્નિર્ગુણત્વં ચ તસ્ય હિ ॥ ૩૦॥

યતો વાચો નિવર્ત્તન્તે અપ્રાપ્ય મનસા સહ ।
શ્રુત્યવિષયતૈવં હિ બ્રહ્મણિ પ્રતિપાદિતમ્ ॥ ૩૧॥

મૈવં શ્રુત્યા તન્મહિમ્ન ઇયત્તાપ્રતિષેધનાત્ ।
અન્યથા બ્રહ્મ વેદે તિશ્રુતિકોપઃ સમાપ્નુયાત્ ॥ ૩૨॥

નિર્વિશેષં પરં બ્રહ્મ સદેવેત્યવધારણાત્ ।
ગુણતોઽપ્યદ્વિતીયં તત્ દ્વિતીયં સહતે ન હિ ॥ ૩૩॥

અધ્યારોપાપવાદન્યાયતો રજ્જાવહેરિવ ।
આરોપો ન પ્રપઞ્ચસ્ય બ્રહ્મણિ નિર્વિશેષકે ॥ ૩૪॥

એવઞ્ચાપિ ન સિધ્યેદ્ધિ બ્રહ્મણિ નિર્વિશેષતા ।
દૃષ્ટાન્તસ્ય હિ વૈરૂપ્યં ભવતઃ કથને યતઃ ॥ ૩૫॥

દૃષ્ટાન્તે રજ્જ્વધિષ્ઠાનં તત્રાજ્ઞાનાદહેર્ભ્રમઃ ।
અજ્ઞાનસ્યાશ્રયો દ્રષ્ટા હ્યપદેષ્ટાઽપ્યપેક્ષ્યતે ॥ ૩૬॥

યતશ્ચાદ્વૈતસિદ્ધાન્તે બ્રહ્મભિન્નં ન કિઞ્ચન ।
સઙ્ગચ્છતે ન દૃષ્ટાન્તો તન્મતેઽતઃ કથઞ્ચન ॥ ૩૭॥

આરોપિતપ્રપઞ્ચસ્ય દ્રષ્ટાકશ્ચેતિ કથ્યતામ્ ।
નાન્યોઽતોઽસ્તિ શ્રુતેર્વાક્યાદ્ બ્રહ્મૈવ નેતરો નનુ ॥ ૩૮॥

એવશ્ચેજ્ જ્ઞાનમાત્રસ્ય બ્રહ્મણો દ્રષ્ટતા કથમ્ ।

માયાયોગેન સા ચેતિ વિકલ્પં સહતે ન હિ ॥ ૩૯॥

આગન્તુકશ્ચ યોગોઽયં સ્વાભાવિકો મતોઽથવા ।
બ્રહ્મણો વિભુતાહાનિરાધે પક્ષે મતે ખલુ ॥ ૪૦॥

માયાશબલમેવ સ્યાદગ્રેઽપિ બ્રહ્મ ચાન્તિમે ।
વિશિષ્ટમેવ તદ્ બ્રહ્મ નાવિશિષ્ટં કદાપિ હિ ॥ ૪૧॥

ગુણાનાં કિન્તુ દિવ્યાનાં વૈશિષ્ટ્યં રાઘવે મતમ્ ।
પ્રાકૃતાનાં ગુણાનાં તુ રાહિત્યં તત્ર બુધ્યતામ્ ॥ ૪૨॥

આચાર્યવાસવશ્રીમન્મઙ્ગલાચાર્યનિર્મિતમ્ ।
વાદોઽયં જયતાન્નિત્યં વાદિનાં વાદસઙ્ગરે ॥ ૪૩॥

ઇતિ શ્રીમઙ્ગલાચાર્યમહામુનીન્દ્રપ્રણીતઃ સગુણનિર્ગુણબ્રહ્માભેદવાદઃ સમ્પૂર્ણઃ ।

Encoded and proofread by Mrityunjay Pandey

*Sagunanirgunabrahmabhedavadah*
pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*